पित्रा सहैवानुमृतिञ्च मातुः। रन्ध्रे शशाङ्के फणिनाथयुक्ते हीने त्वपस्मारयुतः समन्दे। तत्र स्थिते हीनबले शशाङ्के पिशाचपीड़ा च जलाद् द्विपाच्च। भौमाहिमन्दान्यतमेन युक्ते क्षीणे शशाङ्के निधनस्थितेऽपि। दुःस्थे त्वपस्मारभयान्मृतिः स्यात्पिशाचबाधादथ वा मृतिस्तु। रन्ध्रे सराहौ यदि वा सकेतौ चातुर्थिकापीड़नमाहुरस्य। रन्ध्रेश्वरेणापि युते तथैव क्रूरादिषष्ट्यंशयुते तु सत्यम्। नीचस्थिते वाऽमरनायके वा षष्ठाष्टमस्थे यदि पापदृष्टे। राज्ञां प्रकोपान्मरणं पितुश्च तत्पीडया वित्तविनाशमेति"। अधिकमल्पायुःशब्दे ४१२पृष्ठे उक्तम्। अस्य पुरुषादिपूर्व्वपदकत्वे अच् समा० "पुरुषायुषजीविन्यः" रघुः. त्र्यायुषम् मनुष्यायुषमित्यादौ बा० अच् समासान्तः।

आयुर्योगश्च सर्व्वा० चि० दर्शितः यथा "अथायुर्योगः। केचिद्योगं प्रशंसन्ति दशां केचिद्वदन्ति हि। तद्विना चायुषां ज्ञानं न शक्यन्तु मनीषिभिः। त्रिविधस्यायुषो योगः स्वल्पायुर्मध्यमोत्तमः। द्वात्रिंशत्पूर्व्वमल्पन्तु तदूर्ध्वं मध्यमं भवेत्। आ सप्ततेस्तदूर्ध्वन्तु दीर्घायुरिति सम्मतम्। उत्तमायुः शतादूर्ध्वं मुनेः शंसन्ति तद्विदः। आ द्वादशाब्दाज्जन्तूनामायुर्ज्ञानं न शक्यते। जपहोमचिकित्साद्यैर्बालरक्षां तु कारयेत्। पित्रोर्दोषैर्मृताः केचित्केचिद् बालग्रहैरपि। अपरे रिष्टयोगाच्च त्रिविधाऽकालमृत्यवः। जन्मतः प्रबलेनैव बालानां पुष्टिवर्द्धनम्। कथयेदवशेषं तु तथा योगो निरूपितः। अल्पायुर्लग्नपे भानौ शत्रौ मध्यं तु मध्यमे। मित्रे लग्नेश्वरे तस्य दीर्घमायुरुदाहृतम्। अल्पायुर्योगजातस्य विपत्तारे मृतिं वदेत्। जातस्य मध्यमे योगे प्रत्यरौ तु मृतिर्भवेत्। दीर्घायुर्योगजातानां बधभे तु मृतिर्भवेत्। त्रिषु योगेषु सर्व्वेषु प्रत्येकं त्रिविधं भवेत्। अल्पायुरल्पमध्यं तु पूर्णायुस्त्रिविधं स्मृतम्। मध्यमादल्पमध्यं तु पूर्णायुस्त्रिविधं भवेत्। दीर्घायुषोऽल्पमध्ये तु पूर्णायुस्त्रिविधं भवेत्। एवन्नवविधं प्रोक्तमायुषां तु विनिर्णयः। पञ्चम्याराद्दशा मृत्युं दद्यात् षष्ठी गुरोस्तथा। शनेस्तुर्यान्मृत्युः स्याद्दशा राहोश्च सप्तमी। विपज्जन्मदशा कष्टा प्रत्यरीशदशा तथा। बधभेशदशा कष्टा पापा स्यादशुभेक्षिता। नीचारातिविमूढस्था विपत्प्रत्यरिनैधनाः। दशा दद्युर्मृतिं तस्य पापैर्युक्ता विशेषतः। राशिसन्धिषु ये जातास्ते बाला मृतजीविनः। पापदृष्टो युतो वाऽपि निःसंशयमृतिप्रदः। गण्डान्तेषूद्भवो मर्त्यः पितृमातृबलात्ततः। यदि जीवेत्स-र्गपालो गजवाजिसमन्वितः। तृतीयगौ भानुनिशाकरौ वा क्रूरर्क्षगौ क्रूरनिरीक्षितौ च। व्याधिं नरस्यापि वदन्ति तज्ज्ञास्त्रिवर्षमात्रं त्वविलम्बमेतत्। चन्द्रात् स्मरे वासरनाथभौमौ कुजादयो वा मरणं दशाहात्। उद्यद्रेक्काणजामित्रे यस्य स्याद्दारुणो ग्रहः। क्षीणचन्द्रे विलग्नस्थे सद्यो हरति जीवितम्। आपोक्लिमे स्थिताः सर्व्वे ग्रहा बलविवर्ज्जिताः। एकमासं द्विमासं वा तस्यायुः समुदाहृतम्। विलग्नाधिपतिर्नीचे निधने चार्कसंयुते। कृच्छ्रेण जीवनं विन्देन्मृतप्रायो भविष्यति। केतोरुदयः पूर्व्वं पश्चादुल्काग्निपवननिर्घातः। रौद्रे सति च मुहूर्त्ते प्राणैस्त्यज्यते जन्तुः। ग्रहणपरिवेशकाले जातः पापान्विते विलग्नस्थे। लग्नेशे बलहीने जीवति पक्षत्रयं त्रिमासं वा। अंशाधिपतिर्जन्मपतिर्लग्नपश्चास्तमुपागतो यस्य। लग्नावसानमरणं भवेत् कतिपयाहेन। सन्धिचतुष्टयकाले जाते मृत्युं समादिशेत्तज्ज्ञः। पापयुते दृष्टे वा शीघ्रं सौम्यैरदृष्टयुते। राहौ केन्द्रे पापयुक्तेक्षिते वा क्षिप्रं नाशं याति सौम्यैरदृष्टे। पापैः केन्द्रे वार्कलग्ने त्रिकोणे सौम्यैः षष्ठे चाष्टमेऽन्त्ये वदन्ति। जातः क्षीणे शीतगौ लग्नसंस्थे पापैर्दृष्टे नाशमाशु प्रयाति। उच्चक्षेत्रे मेषराशिं च हित्वा राहुर्युक्तस्तेष्वपि प्राणनाशः। लग्नात्स्वान्त्यौ पापयुक्तौ यदि स्तस्तत्षष्ठान्त्ये वा विनश्येत् क्षणेन। लग्नाद्बाले चाष्टमे पापचारैः सोमे क्षीणे त्वष्टमाब्दं च जीवेत्। केन्द्रैश्चन्द्रात्पापयुक्तैरसौम्यैः स्वर्गं यानं प्रोच्यते वत्सरेण। जन्माधिपे लग्नगे क्रूरयुक्ते पश्यत्यार्किश्चाष्टमे जीववर्गे। षष्ठे वर्षे द्वादशे वाऽष्टमे वा सन्धौ राशेर्जातको मृत्युमेति। षष्ठेऽष्टमे वा हिमगौ च यस्य क्षीणे चन्द्रे पापयुक्तेऽथ वापि। सौम्यैर्दृष्टे त्वष्टमाब्दञ्च जीवेत् पापैः सौम्यैर्मिश्रितैस्तद्दलं स्यात्। जीवे विलग्ने मिथुने तुलायां शुक्रेण युक्ते शशिसूनुना च। पापैर्दृष्टे मृत्युराशिस्थिते वा जीवेद्वर्षं चाष्टमं चैव बालः। लग्ने क्षीणे शशिनि निधनं रन्ध्रकेन्द्रेषु पापैः पापान्तःस्थे निधनहिबुके द्यूनयुक्ते च चन्द्रे। एवं लग्ने भवति मदनच्छिद्रसंस्थे च पापे माता सार्कं यदि च न शुभैर्वीक्षितः शक्तिमद्भिः। राहुग्रस्ते शीतरश्मौ विलग्ने क्रूरे युक्ते चाष्टमे भूमिपुत्रे। माता सार्द्धं चन्द्रवद्भास्करेण ग्रस्तो वा तेनाशु मृत्युं प्रयाति। अस्तङ्गते दिनपतौ रविजे विलग्ने भौमेऽथ वापि निधनं व्रजति त्रिवर्षात्। एवं स्थितेऽपि हिमगावशुभैरदृष्टे राशुग्रहे च नियत